## १. क्रुधद्रुहोरुपसृष्टयोः कर्म १/४/३८

**पदच्छेदः** – क्रुधद्रुहोः, उपसृष्टयोः, कर्म – इति सम्प्रदानसंज्ञाविधायकं त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** – **कर्मणा यमभिप्रैति स सम्प्रदानम्** इति सूत्रात् **सम्प्रदानम्** इत्यनुवर्तते। **क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः** इति सूत्रात् **यं प्रति कोपः** इति च।

**समासः** – क्रुधश्च द्रुह् च इति क्रुधद्रुहौ, तयोः। उपसृष्टयोः = उपसर्गयुक्तयोः।

**वृत्तिः** – सोपसर्गयोः अनयोः योगे यं प्रति कोपः, तत् कर्मसंज्ञं स्यात्।

**सूत्रार्थः** – उपसर्गयुक्तयोः 'क्रुध क्रोधे, द्रुह जिघांसायाम्' इत्येतयोः धात्वोः योगे यं प्रति कोपः, तस्य कर्मसंज्ञा भवति।

**उदाहरणम्** –

प्रजाः क्रूरं नेतारम् अभिक्रुध्यन्ति, अभिद्रुह्यन्ति च।

लक्ष्मणः शूर्पणखाम् अभिक्रुध्यति।

## २. राधीक्ष्योर्यस्य विप्रश्नः १/४/३९

**पदच्छेदः** – राधीक्ष्योः, यस्य, विप्रश्नः – सम्प्रदानसंज्ञाविधायकं त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** – **कर्मणा यमभिप्रैति स सम्प्रदानम्** इति सूत्रात् **सम्प्रदानम्** इत्यनुवर्तते।

**समासः** - राधिश्च, ईक्षिश्च इति राधीक्षी, तयोः। विविधः प्रश्नः = विप्रश्नः।

'यस्य' इत्यस्य अनन्तरं 'विषये' इति अध्याह्रियते।

राध्, ईक्ष् एताभ्यां धातुभ्यां 'इक्श्तिपौ धातुनिर्देशे' इति वार्तिकेण इक्-प्रत्ययः अस्ति।

**वृत्तिः** - एतयोः कारकं सम्प्रदानं स्यात्, यदीयो विविधः प्रश्नः क्रियते।

**सूत्रार्थः** - 'राध संसिद्धौ' 'ईक्ष दर्शने' इत्येतयोः 'शुभाशुभपर्यालोचनार्थकयोः' योगे यस्य विषये विविधः प्रश्नः क्रियते, तत् कारकं सम्प्रदानसंज्ञं स्यात्। शुभाशुभरूपकर्मणोः धात्वर्थेन कथनात् उभौ अपि धातू अत्र अकर्मकौ।

'यस्य विप्रश्नः' इति पदाभ्याम् अत्र धात्वोः 'शुभाशुभपर्यालोचनम् अर्थः' इति गम्यते।

**उदाहरणम्**- ज्यौतिषाचार्यः मम भगिन्यै राध्यति।

राध्धातुः शुभाशुभपर्यालोचनार्थे अत्र अस्ति इति कारणात् अकर्मकः। अतः अकर्मकत्वात् **राधोऽकर्मकात्** इति गणसूत्रेण श्यन्प्रत्ययो भवति।

**धातूनाम् अनेकार्थाः।**

('भगिनीविषये मया पृष्टः ज्यौतिषाचार्यः तस्याः सन्दर्भे शुभम् अशुभं वा पर्यालोचयति' इति तात्पर्यम्।

गर्गः कृष्णाय ईक्षते। (नन्देन कृष्णस्य शुभाशुभविषये पृष्टः गर्गः तद्विषये पर्यालोचयति।)

अमात्यः युद्धाय राध्यति।

ज्यौतिषी मह्यम् ईक्षते।

### ३. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता १/४/४०

**पदच्छेदः** - सम्प्रदानसंज्ञाविधायकं चतुष्पदमिदं सूत्रम्।

**अनुवृत्तिः** - **कर्मणा यमभिप्रैति स सम्प्रदानम्** इति सूत्रात् **सम्प्रदानम्** इत्यनुवर्तते।

**समासः** - प्रतिश्च आङ् च इति प्रत्याङौ, ताभ्याम्।

**वृत्तिः** - आभ्यां परस्य श्रृणोतेर्योगे पूर्वस्य प्रवर्तनारूपव्यापारस्य कर्ता सम्प्रदानं स्यात्।

**सूत्रार्थः** - प्रतिपूर्वकस्य आङ्पूर्वकस्य च श्रु-धातोः योगे पूर्वस्य (प्रेरणारूपस्य, प्रवर्तनारूपस्य वा) व्यापारस्य कर्ता सम्प्रदानसंज्ञां लभते।

प्रति-श्रु तथा च आश्रु - एतयोः 'प्रेरणापूर्वकाभ्युपगमः/अङ्गीकारः' इत्यर्थः अत्र।

**उदाहरणम्**- यजमानः विप्राय गां प्रतिश्रृणोति, आश्रृणोति वा।

विप्रः मह्यं गां देहि इति प्रैरयत्।

अमेरिकीप्रजाः बाइडन-कमलाभ्यां मतानि प्रत्यश्रृण्वन्।

पूर्वं विप्रः - गां मह्यं देहि' इति प्रेरितवान्, तदनुसारं यजमानः 'विप्राय गां दास्यामि इति प्रतिश्रृणोति।' अत्र 'विप्रः' पूर्वव्यापारस्य 'मह्यं देहि' इति प्रेरणारूपव्यापारस्य कर्ता, अतः तस्य उत्तरे वाक्ये सम्प्रदानत्वम्।

– **'विप्रेण मह्यं देहीति प्रवर्तितस्तत् प्रतिजानीते' इत्यर्थः।**

## ४. अनुप्रतिगृणश्च १/४/४१

**पदच्छेदः** - अनुप्रतिगृणः, च - सम्प्रदानसंज्ञाविधायकं द्विपदमिदं सूत्रम्।

**अनुवृत्तिः - कर्मणा यमभिप्रैति स सम्प्रदानम्** इति सूत्रात् **सम्प्रदानम्** इत्यनुवर्तते। **प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता** इति सूत्रात् **पूर्वस्य कर्ता** इत्यनुवर्तते।

**समासः** - अनुश्च प्रतिश्च इति अनुप्रती, अनुप्रतीपूर्वको गृणा इति अनुप्रतिगृणा, तस्य - अनुप्रतिगृणः (**आतोः धातोः** इति सूत्रेण आकारस्य लोपः)। अनुगृ, प्रतिगृ - इत्यनयोः 'प्रोत्साहनम्' इति अर्थः अत्र।

**वृत्तिः** - आभ्यां गृणातेः कारकं सम्प्रदानं स्यात्।

**सूत्रार्थः** - अनुपूर्वकस्य प्रतिपूर्वकस्य च 'गॄ(दीर्घॠकारान्तः) शब्दे' इति धातोः योगे पूर्वस्य 'शंसनव्यापारस्य(शंसु स्तुतौ) कर्ता सम्प्रदानसंज्ञां लभते।

**उदाहरणम्**- होत्रे अनुगृणाति। (होता प्रथमं देवं शंसति, तम् अध्वर्युः प्रोत्साहयति।)

पुत्रः सत्कार्यं करोति, पितरौ पुत्राय अनुगृणीतः।